# rAtrisUktam

# રાત્રિસૂક્તમ્

## Document Information

Text title : rAtrisUkta

File name : rAtrisUktam.itx

Category : veda, svara, sUkta, devii, devI, otherforms

Location : doc_veda

Proofread by : Palak, NA, Muralikesavan T

Description-comments : There are additional Richas from Khilas in Mantrapusham book

Source : https://sanskritdocuments.org/mirrors/rigveda/e-text.htm + mantrapuShpam newer edition

Latest update : January 02, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# રાત્રિસૂક્તમ્

ઋગ્વેદસંહિતાયાં દશમં મણ્ડલં, ૧૨૭ સપ્તવિંશત્યુત્તરશતતમં સૂક્તમ્ ।

ઋષિઃ- કુશિકઃ સૌભરો રાત્રિર્વા ભારદ્વાજી । દેવતા- રાત્રિસ્તવઃ ।

છન્દઃ- ૧, ૩, ૬ વિરાડ્ગાયત્રી; ૨ પાદનિચૃદ્ગાયત્રી; ૪, ૫, ૮ ગાયત્રી; ૭ નિચૃદ્ગાયત્રી ।

સ્વરઃ-ષડ્જઃ ।

ૐ રાત્રી વ્યખ્યદાયતી પુરુત્રા દેવ્ય૧ક્ષભિઃ ।

વિશ્વા અધિ શ્રિયોઽધિત ॥ ૧૦.૧૨૭.૦૧

ઓર્વપ્રા અમર્ત્યા નિવતો દેવ્યુ૧દ્વતઃ ।

જ્યોતિષા બાધતે તમઃ ॥ ૧૦.૧૨૭.૦૨

નિરુ સ્વસારમસ્કૃતોષસં દેવ્યાયતી ।

અપેદુ હાસતે તમઃ ॥ ૧૦.૧૨૭.૦૩

સા નો અદ્ય યસ્યા વયં નિ તે યામન્નવિક્ષ્મહિ ।

વૃક્ષે ન વસતિં વયઃ ॥ ૧૦.૧૨૭.૦૪

નિ ગ્રામાસો અવિક્ષત નિ પદ્વન્તો નિ પક્ષિણઃ ।

નિ શ્યેનાસશ્ચિદર્થિનઃ ॥ ૧૦.૧૨૭.૦૫

યાવયા વૃક્ય૧ં વૃકં યવય સ્તેનમૂર્મ્યે ।

અથા નઃ સુતરા ભવ ॥ ૧૦.૧૨૭.૦૬

ઉપ મા પેપિશત્તમઃ કૃષ્ણં વ્યક્તમસ્થિત ।

ઉષ ઋણેવ યાતય ॥ ૧૦.૧૨૭.૦૭

ઉપ તે ગા ઇવાકરં વૃણીષ્વ દુહિતર્દિવઃ ।

રાત્રિ સ્તોમં ન જિગ્યુષે ॥ ૧૦.૧૨૭.૦૮

॥ પરિશિષ્ટમ્ ॥

આ રાત્રિ પાર્થિવં રજઃ પિતરઃ પ્રાયુ ધામભિઃ ।

દિવઃ સતામ્સિ બૃહતી વિ તિષ્ઠ સ આ ત્વેષં વર્તતે તમઃ ॥ ૧

યે તે રાત્રિ નૃચક્ષસો યુક્તાસો નવતિર્નવ ।

અશીતિઃ સંત્વષ્ટા ઉતો તે સપ્ત સપ્તતીઃ ॥ ૨

રાત્રીં પ્રપત્યે જનનીં સર્વભૂતનિવેશનીમ્ ।

ભદ્રાં ભગવતીં કૃષ્ણાં વિશ્વસ્ય જગતો નિશામ્ ॥ ૩

સમ્વેશિનીં સંયમિનીં ગ્રહનક્ષત્રમાલિનીમ્ ।

પ્રપન્નોઽહં શિવાં રાત્રીં ભદ્રે પારમશીમહિ

(ભદ્રે પારમશીમહ્યોં નમઃ) ॥ ૪

સ્તોષ્યામિ પ્રયતો દેવીં શરણ્યાં બહ્વૃચપ્રિયામ્ ।

સહસ્રસંહિતાં દુર્ગામ્ જાતવેદસે સુનવામ સોમમ્ ॥ ૫

શાન્ત્યર્થં તદ્ દ્વિજાતીનામૃષિભિઃ સોમપાશ્રિતાઃ ।

ઋક્વેદે ત્વં સંમૂત્પનાઽરાત્રીયતો નિ દહાતિ વેદઃ ॥ ૬

યે ત્વાં દેવિ પ્ર પત્યન્તિ બ્રાહ્મણા હવ્યવાહનીમ્ ।

અવિત્યા બહુવિત્યા વા સનઃ પર્ષદતિ દુર્ગાણિ વિશ્વા ॥ ૭

યે અગ્નિવર્ણાં શુભાં સૌમ્યાં કીર્તયિષ્યન્તિ યે દ્વિજાઃ ।

તામ્સ્તારયતિ દુર્ગાણિ નાવેવ સિન્ધું દુરિતાત્યગ્નિઃ ॥ ૮

દુર્ગેષુ વિષમે ઘોરે સઙ્ગ્રામે રિપુસઙ્કટે ।

અગ્નિચોરનિપાતેષુ દુષ્ટગ્રહનિવારિણિ

દુષ્ટગ્રહનિવારિણ્યોન્નમઃ ॥ ૯

દુર્ગેષુ વિષ્મેષુ ત્વં સઙ્ગ્રામેષુ વનેષુ ચ ।

મોહયિત્વા પ્રપત્યમ્તે તેષાં મે અભયં કુરુ ।

તેષાં મે અભયં કુરુવોન્નમઃ ॥ ૧૦

કેશિનીં સર્વભૂતાનાં પઞ્ચમીતિ ચ નામ ચ ।

સા માં સમા નિશા દેવી સર્વતઃ પરિ રક્ષતુ ।

સર્વતઃ પરિ રક્ષત્વોન્નમઃ ॥ ૧૧

તામગ્નિવર્ણાં તપસા જ્વલમ્તીં વૈરોચનીં કર્મફલેષુ જુષ્ટાં ।

દુર્ગાં દેવીં શરણમહં પ્રપદ્યે સુતરસિ તરસે નમઃ ।

સુતરસિ તરસે નમઃ ॥ ૧૨
દુર્ગા દુર્ગેષુ સ્થાનેષુ શં નો દેવીરભિષ્ટયે ।
ય ઇમં દુર્ગાસ્તવં પુણ્યં રાત્રૌરાત્રૌ સદા પઠેત્ ॥ ૧૩
રાત્રિઃ કુશિકસોભરો રાત્રિર્વા ભારદ્વાજી રાત્રિસ્તવો ગાયત્રી ।
રાતરીસૂક્તં જપેન્નિત્યં તત્કાલમુપપદ્યતે ॥ ૧૪
ઉલૂકયાતું શીશીલૂકયાતું જહિ શ્વયાતુમુત કોકયાતુમ્ ।
સુપર્ણયાતુમુત ગૃધ્રયાતું દૃષદેવ પ્રમૃણ રક્ષ ઇન્દ્ર ॥ ૧૫
પિશઙ્ગભૃષટિમમ્ભૃણં પિશાચિમિન્દ્ર સં મૃણ ।
સર્વં રક્ષો નિબર્હય ॥ ૧૬
હિમસ્ય ત્વા જરાયુણા શાલે પરિ વ્યયામસિ ।
(ઉત હ્રદો હિ નો ધિયોગ્નિર્દદાતુ ભેષજમ્) ॥ ૧૭
શીશીતહ્રદો હિ નો ધિયોગ્નિર્દદાતુ ભેષજમ્ ।
અન્તિકામગ્નિમજનય દૂર્વાદઃ શીશીલાગમત્ ॥ ૧૮
અજાતપુત્રપક્ષાયા હૃદયં મમ દૂયતે ।
વિપુલં વનં બહ્વાકાશં ચર જાતવેદઃ કામાય ॥ ૧૯
માં ચ રક્ષ પુત્રાંશ્ચ શરણમભૂત્ તવ ।
પિ ઙ્ગાક્ષ લોહિતગ્રીવ કૃષ્ણવર્ણ નમોસ્તુ તે ॥ ૨૦
અસ્માન્નિબર્હરસ્યેનાં સાગરસ્યોર્મયો યથા ।
ઇન્દ્રઃ ક્ષત્રં દદાતુ વરૂણમભિ ષિમ્ચતુ ॥ ૨૧
શત્રવો નિધનં યાન્તુ જય ત્વં બ્રહ્મતેજસા ॥ ૨૨
કપિલજટીં સર્વભક્ષં ચાગ્નિં પ્રત્યક્ષ દૈવતમ્ ॥ ૨૩
વરુણં ચ વશામ્યગ્રે મમ પુત્રાંશ્ચ રક્ષતુ
(મમ પુત્રાંશ્ચ રક્ષત્વોન્નમઃ) ॥ ૨૪
સાગ્રં વર્ષશતં જીવ પિબ ખાદ ચ મોદ ચ ॥ ૨૫
દુઃખિતાંશ્ચ દ્વિજાંશ્ચૈવ પ્રજાં ચ પશુ પાલય ॥ ૨૬
યાવદાદિત્યસ્તપતિ યાવદ્ભ્રાજતિ ચન્દ્રમાઃ ।
યાવદ્વાયુઃ પ્લવાયતિ તાવજ્જીવ જયા જય ॥ ૨૭

યેન કેન પ્રકારેણ કો હિ નામ નુ જીવતિ ।
પરેષામુપકારાર્થં યજ્જીવતિ સ જીવતિ ।
એતાં વૈશ્વાનરીં સર્વદેવાન્નમોસ્તુ તે ॥ ૨૮
ન ચોરભયં ન ચ સર્પભયં ન ચ વ્યાઘ્રભયં ન ચ મૃત્યુભયમ્ ।
યસ્યાપમૃત્યુર્ન ચ મૃત્યુઃ સર્વમ્ લભતે સર્વં જયતે ॥ ૨૯
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ ઇતિ પરિશિષ્ટમ્ ॥

## રાત્રિસૂક્તં સ્વરરહિતમ્

રાત્રી વ્યખ્યદાયતી પુરુત્રા દેવ્ય૧ક્ષભિઃ ।
વિશ્વા અધિ શ્રિયોઽધિત ॥ ૧૦.૧૨૭.૦૧
ઓર્વપ્રા અમર્ત્યા નિવતો દેવ્યુ૧દ્વતઃ ।
જ્યોતિષા બાધતે તમઃ ॥ ૧૦.૧૨૭.૦૨
નિરુસ્વસારમસ્કૃતોષસં દેવ્યાયતી ।
અપેદુ હાસતે તમઃ ॥ ૧૦.૧૨૭.૦૩
સા નો અદ્ય યસ્યા વયં નિ તે યામન્નવિક્ષ્મહિ ।
વૃક્ષે ન વસતિં વયઃ ॥ ૧૦.૧૨૭.૦૪
નિ ગ્રામાસો અવિક્ષત નિ પદ્વન્તો નિ પક્ષિણઃ ।
નિ શ્યેનાસશ્ચિદર્થિનઃ ॥ ૧૦.૧૨૭.૦૫
યાવયા વૃક્યં૧ વૃકં યવય સ્તેનમૂર્મ્યે ।
અથા નઃ સુતરા ભવ ॥ ૧૦.૧૨૭.૦૬
ઉપ મા પેપિશત્તમઃ કૃષ્ણં વ્યક્તમસ્થિત ।
ઉષ ઋણેવ યાતય ॥ ૧૦.૧૨૭.૦૭
ઉપ તે ગા ઇવાકરં વૃણીષ્વ દુહિતર્દિવઃ ।
રાત્રિ સ્તોમં ન જિગ્યુષે ॥ ૧૦.૧૨૭.૦૮

॥ પરિશિષ્ટમ્ ॥

આ રાત્રિ પાર્થિવં રજઃ પિતરઃ પ્રાયુ ધામભિઃ ।
દિવઃ સતામ્સિ બૃહતી વિ તિષ્ઠ સ આ ત્વેષં વર્તતે તમઃ ॥ ૧
યે તે રાત્રિ નૃચક્ષસો યુક્તાસો નવતિર્નવ ।

અશીતિઃ સંત્વષ્ટા ઉતો તે સપ્ત સપ્તતીઃ ॥ ૨
રાત્રીં પ્રપત્યે જનનીં સર્વભૂતનિવેશનીમ્ ।
ભદ્રાં ભગવતીં કૃષ્ણાં વિશ્વસ્ય જગતો નિશામ્ ॥ ૩
સમ્વેશિનીં સંયમિનીં ગ્રહનક્ષત્રમાલિનીમ્ ।
પ્રપન્નોઽહં શિવાં રાત્રીં ભદ્રે પારમશીમહિ
(ભદ્રે પારમશીમહ્યોં નમઃ) ॥ ૪
સ્તોષ્યામિ પ્રયતો દેવીં શરણ્યાં બહ્વૃચપ્રિયામ્ ।
સહસ્રસંહિતાં દુર્ગાં જાતવેદસે સુનવામ સોમમ્ ॥ ૫
શાન્ત્યર્થં તદ્ દ્વિજાતીનાઋષિભિઃ સોમપાશ્રિતાઃ ।
ઋક્વેદે ત્વં સંમૂત્પના રાત્રીયતો નિ દહાતિ વેદઃ ॥ ૬
યે ત્વાં દેવિ પ્ર પત્યન્તિ બ્રાહ્મણા હવ્યવાહનીમ્ ।
અવિત્યા બહુવિત્યા વા સનઃ પર્ષદતિ દુર્ગાણિ વિશ્વા ॥ ૭
યે અગ્નિવર્ણાં શુભાં સૌમ્યાં કીર્તયિષ્યન્તિ યે દ્વિજાઃ।
તામ્સ્તારયતિ દુર્ગાણિ નાવેવ સિન્ધું દુરિતાત્યગ્નિઃ ॥ ૮
દુર્ગેષુ વિષમે ઘોરે સઙ્ગ્રામે રિપુસઙ્કટે ।
અગ્નિચોરનિપાતેષુ દુષ્ટગ્રહનિવારિણિ
દુષ્ટગ્રહનિવારિણ્યોન્નમઃ ॥ ૯
દુર્ગેષુ વિષ્મેષુ ત્વં સઙ્ગ્રામેષુ વનેષુ ચ ।
મોહયિત્વા 'પ્રપત્યમ્ન્તે તેષાં મે અભયં કુરુ ।
તેષાં મે અભયં કુરુવોન્નમઃ ॥ ૧૦
કેશિનીં સર્વભૂતાનાં પઞ્ચમીતિ ચ નામ ચ ।
સા માં સમા નિશા દેવી સર્વતઃ પરિ રક્ષતુ ।
સર્વતઃ પરિ રક્ષત્વોન્નમઃ ॥ ૧૧
તામગ્નિવર્ણાં તપસા જ્વલમ્તીં વૈરોચનીં કર્મફલેષુ જુષ્ટામ્ ।
દુર્ગાં દેવીં શરણમહં પ્રપદ્યે સુતરસિ તરસે નમઃ ।
સુતરસિ તરસે નમઃ ॥ ૧૨
દુર્ગા દુર્ગેષુ સ્થાનેષુ શં નો દેવીરભિષ્ટયે ।
ય ઇમં દુર્ગાસ્તવં પુણ્યં રાત્રૌરાત્રૌ સદા પઠેત્ ॥ ૧૩
રાત્રિઃ કુશિકસોભરો રાત્રિર્વા ભારદ્વાજી રાત્રિસ્તવો ગાયત્રી ।
રાતરીસૂક્તં જપેન્નિત્યં તત્કાલમુપપદ્યતે ॥ ૧૪
ઉલૂકયાતું શીશીલૂકયાતું જહિ શ્વયાતુમુત કોકયાતુમ્ ।
સુપર્ણયાતુમુત ગૃધ્રયાતું દૃષદેવ પ્રમૃણ રક્ષ ઇન્દ્ર ॥ ૧૫

પિશઙ્ગભૃષટિમમ્ભૃણં પિશાચિમિન્દ્ર સં મૃણ ।
સર્વં રક્ષો નિબર્હય ॥ ૧૬
હિમસ્ય ત્વા જરાયુણા શાલે પરિ વ્યયામસિ ।
(ઉત હ્રદો હિ નો ધિયોગ્નિર્દદાતુ ભેષજમ્) ॥ ૧૭
શીશીતહ્રદો હિ નો ધિયોગ્નિર્દદાતુ ભેષજમ્ ।
અન્તિકામગ્નિમજનય દૂર્વાદઃ શીશીલાગમત્ ॥ ૧૮
અજાતપુત્રપક્ષાયા હૃદયં મમ દૂયતે ।
વિપુલં વનં બહ્વાકાશં ચર જાતવેદઃ કામાય ॥ ૧૯
માં ચ રક્ષ પુત્રાંશ્ચ શરણમભૂત્ તવ ।
પિઙ્ગાક્ષ લોહિતગ્રીવ કૃષ્ણવર્ણ નમોઽસ્તુ તે ॥ ૨૦
અસ્માન્નિબર્હરસ્યેનાં સાગરસ્યોર્મયો યથા ।
ઇન્દ્રઃ ક્ષત્રં  દદાતુ વરૂણમભિ ષિઞ્ચતુ ॥ ૨૧
શત્રવો નિધનં યાન્તુ જય ત્વં બ્રહ્મતેજસા ॥ ૨૨
કપિલજટીં સર્વભક્ષં ચાગ્નિં પ્રત્યક્ષ દૈવતમ્ ॥ ૨૩
વરુણં ચ વશામ્યગ્રે મમ પુત્રાંશ્ચ રક્ષતુ
(મમ પુત્રાંશ્ચ રક્ષત્વોન્નમઃ) ॥ ૨૪
સાગ્રં વર્ષશતં જીવ પિબ ખાદ ચ મોદ ચ ॥ ૨૫
દુઃખિતાંશ્ચ દ્વિજાંશ્ચૈવ પ્રજાં ચ પશુ પાલય ॥ ૨૬
યાવદાદિત્યસ્તપતિ યાવદ્ભ્રાજતિ ચન્દ્રમાઃ ।
યાવદ્વાયુઃ પ્લવાયતિ તાવજ્જીવ જયા જય ॥ ૨૭
યેન કેન પ્રકારેણ કો હિ નામ નુ જીવતિ ।
પરેષામુપકારાર્થં યજ્જીવતિ સ જીવતિ ।
એતાં વૈશ્વાનરીં સર્વદેવાન્નમોઽસ્તુ તે ॥ ૨૮
ન ચોરભયં ન ચ સર્પભયં ન ચ વ્યાઘ્રભયં ન ચ મૃત્યુભયમ્ ।
યસ્યાપમૃત્યુર્ન ચ મૃત્યુઃ સર્વં લભતે સર્વં જયતે ॥ ૨૯
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ ઇતિ પરિશિષ્ટમ્ ॥

ઇતિ રાત્રિસૂક્તમ્ ।

*rAtrisUktam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*